International Research Journal of Humanities, Language and Literature
ISSN: (2394-1642)
Impact Factor 5.401 Volume 7, Issue 12, December 2020
Association of Academic Researchers and Faculties (AARF)
Website-www.aarf.asia, Email : editor@aarf.asia , editoraarf@gmail.com

# अपभ्रंशेनार्थावबोधः

**डॉ. नन्द किशोर तिवारी**
सहायकाचार्य: व्याकरणविद्याशाखा
केन्द्रीय-संस्कृत-विश्वद्यालय:,
भोपाल-परिसर: भोपालम्
मध्यप्रदेश: -462043

**सारांश:-**

अस्मिन् शोधपत्रे अयं विचार: प्रस्तुतो यत् यथा संस्कृतशब्दानां प्रयोगानन्तरं तत: साक्षादेवार्थप्रत्यायनं भवति। तथैव यदि अपभ्रंशशब्दानां प्रयोगः भवति चेत्तेन साक्षादर्थप्रत्यायनं भवति न वेति। तत्र ईश्वरसंकेते शक्तिं मन्यमाना: नैयायिकाः स्वीकुर्वन्ति यत् अपभ्रंशा ईश्वरीयसंकेतरहिता: सन्त्यत: तत्र वाचकताशक्तिर्न भवति। अत अपभ्रंशप्रयोगानन्तरं साधुशब्दव्यवधानपूर्वकार्थबोधो जायते। वैयाकरणास्तु अपभ्रंशेष्वपि वाचकताशक्तिं स्वीकुर्वन्ति इत्ययं पक्ष: सप्रमाणं विचारित:।

**कूटशब्दा:-** प्रतिक्रोशचतुष्टयं, विगुणाभिधाता गीर्वाणवाणी, अङ्गभावः

**प्रस्तावना-**

भाषामुद्दिश्य बहो: कालात् पूर्वत एवायं विवाद: प्रचलन्नस्ति द्वयो: परस्परं बहूनां जनानां समुदाये व्यवहारकाले यदा शब्दस्य उत् वा वाक्यस्य प्रयोग: क्रियते तदा तस्माच्छब्दादर्थबोध: कथं जायते। स्वातन्त्र्योत्तरकालेऽस्माकं देशस्य भारतवर्षस्य प्रान्तानां यद्विभाजनमभवत् तदपि भाषामधिकृत्यैवाभवत्। दक्षिणभारतीयराज्यानां भाषासु संस्कृतशब्दानां बाहुल्येन प्रयोगो यथा-उत्तरभारतीयप्रान्तेषु तथा न दृश्यते। न केवलं राज्येषु अपितु राज्यान्तर्गतस्थानेषु प्रतिक्रोशं जले परिवर्तनं प्रतिक्रोशचतुष्टयं तद्भाषागतानां शब्दानां तेषां उच्चारणादिक्रमस्य व्यवहारनियमस्य बोध्यस्यार्थस्य च परिवर्तनं दृश्यते। अस्य परिवर्तनस्य कारणानि कानि सन्तीति निश्चयेन वक्तुं न शक्यते। किन्तु तत्तत्स्थानेषु निवसतां जनानां जीवनशैली तत्रत्य: परिवेश: तत्रत्यौ जलवायू इत्येवन्तत्र बहूनि कारणानि भवन्ति। यया भाषया कस्मिँश्चित् समुदाये वाग्व्यवहार: प्रचलति सैवान्यस्मिन्समुदायेऽर्थबोधमपि नोत्पादयति। प्रशासनाय या भाषा भवति सा राजभाषानाम्ना व्यवह्रयते, तस्या: प्रयोग: सर्वेषु सर्वकारीय-कार्यालयेषु आवश्यकरूपेण कर्तव्यो भवति, किन्तु सैव भाषा दैनन्दिने व्यवहारेऽपि प्रजाभिरपि व्यवह्रयेत ईदृशी राजाज्ञा न भवति। इदानीं हिन्दीभाषा भारतीयसर्वकारेण घोषिता राजभाषा अस्ति। भारतवर्षस्य कतिपयेषु प्रान्तेषु तेषां स्वीया राजभाषा

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

अपि उद्घोषिता अस्ति। किन्तु सम्पूर्णेष्वपि तत्तत् प्रान्तेषु उद्घोषितानां तत्तद्राजभाषाणामविकलरूपेण प्रयोगस्तत्तत्प्रान्तीयजना:कुर्वन्त्येव इति सन्देहो नूनमेव मम मनसि वर्तत एव। तत्र कारणं किमिदमिति अहर्निशं चिन्त्यमानेन मया इदमवधारितं यद् सर्वत्र सर्वेष्वपि देशेषु प्रचलन्तीनां भाषाणां गतिर्द्वयी भवति। तत्रैका नैजेन व्याकरणेन लब्धसंस्कारा परिमार्जिता विशिष्टैर्जनैर्भाषमाणा किं वा सर्वकारीयकार्याणां निष्पादिका विपुलकाव्यशास्त्रादिविविधग्रन्थानां निबन्धिनिभाषारूपेण गौरवमालभमाना अत एव च विशिष्टैर्जनै: समादृता, अपरा तदीय व्याकरणप्रतिपादितनियमाननङ्गीकुर्वती संस्कारभ्रष्टा अत एव असंस्कृता अज्ञैरल्पज्ञैर्वा जनैर्भाषिता भवति। अनेन इदमपि प्रतिपादितं भवति यत्सर्वदैव मुख्यया भाषया समं तत्सहचारिण्योऽपरा अपि भाषा भवन्ति स्म। यस्यां भाषायां भगवान् वेदोऽवतरित: तत्समकाले अन्या अपि वेदबाह्या भाषा आसीदिति निश्चिनोमि। एवमेव रामायणकाले महाभारतकालेऽपि यया एते ग्रन्था निगदिता: सन्ति ततो किंचिद्भिन्ना लोकेषु प्रचलिता लोकभाषा अवश्यं विराजमाना भवेदित्यनुमिनोमि।

अद्यत्वे कियत्कालादारभ्य संस्कृतभाषाया: स्थितिस्तथा नास्ति यथा ततोऽपि पूर्वं बहुपूर्वं भवति स्म। तस्मिन् समये संस्कृतस्य वैशिष्ट्यम् अनेनैव सुविज्ञातं भवति यत् सकलज्ञानस्य विज्ञानस्य च प्रतिपादकानां ग्रन्थानां निबन्धनम् अस्यामेव क्रियते स्म। सेयं संस्कृतभाषा बहुविधानां संस्कृतीनाम् उत्पादयित्री पोषणकर्त्री संरक्षिकाऽरक्षिका च भवति स्म। किन्तु अस्या रक्षार्थंबहुविधा: प्रयत्ना: विधीयन्ते यैरियं संरक्षिता भवेत्। सर्वेषां लोकानां हिताकांक्षिण्या अस्या: संस्कृत-भाषाया: इयं दशा केन प्रापिता इति निर्णयो दुष्करोऽस्ति। प्रमोदस्य विषय: सम्प्रत्ययमस्ति यत् इयं दैवी वाक् पुनरपि एधमाना सती अहर्निशं प्रसरणशीला इवावलोकिता भवति। अस्या: भाषाया: संस्कृतं नाम कथं-कृत्वा जातमस्ति इत्यस्मिन् विषयेऽनेकेषां जनानां नैकानि मतान्युपलभ्यन्ते। विषयेऽस्मिन् कतिपयानां विदुषां सम्मतिरस्ति यदस्या भाषाया: जननी अर्थात् प्रकृतिभूता प्राकृतभाषा अस्ति। तस्या: संस्कारं कृत्वा अस्या: स्वरूपमुपलब्धोऽस्ति,अस्मात् कारणादेव इयं संस्कृतमिति नाम्ना प्रसिद्धिमवाप,अस्या: प्रकृतिभूता या भाषा आसीत्तस्याभिधानं प्राकृत इति जातम्। इतरे स्वीकुर्वन्ति यत् संस्कृतं गीर्वाणवाणी अस्ति अथ चेयं कदाचिदपशब्दैर्मिश्रिता नैवासीत् यस्या: संस्कारस्यावश्यकता अनुभूयेत। यत् किञ्चिदपि भवतु विषयेऽस्मिन् न मया किञ्चिदपि विचारणीया अस्ति किन्तु विचारणीयमिदमस्ति यत् या प्राकृतभाषा अस्ति सैव पुरातनै: अपभ्रंश उत वा अपशब्दनाम्ना व्यवहारभाग्भवति स्म। ईदृशी सम्भावना सुदृढायते यतो हि अस्या निराकरणाय किमपि कारणं न दृश्यते यतो हि नूनमेव इयं संस्कृतबाह्या सती असंस्कृता तादृशैरेव जनैरुपयुज्यमाना अस्तीति नाटकादिनामवलोकनेन विचारसरणीय परिपोषं गच्छति।

**प्रतिपाद्यविषय:-**

इदानीं पुनरिदं विचार्यते यदस्या: अपभ्रंशभाषाया: स्वरूपं किमस्ति? अस्मिन् विषये मुनित्रयानन्तरं सर्वैरपि विद्वद्वरेण्यै: समादृतैर्वाक्यपदीयस्य कर्त्रा महामतिमता आचार्यभर्तृहरिणा तदीयस्य ग्रन्थस्य प्रथमे काण्डे निगदितमस्ति यत्-

**शब्दसंस्कारहीनो यो गौरिति प्रयुयुक्षिते।**
**तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम्।। इति**[1]

अर्थात् गौ: इत्ययं शब्द: सास्नादिमति पशुविशेषेऽर्थे शब्दशास्त्रज्ञर्विद्भि: प्रयुक्तो भवति। स एव गौ: इत्ययं शब्द: सास्नादिमति पशुविशेषेऽर्थे प्रसिद्धसाधुभावोऽस्ति। तत्र यदि सास्नादिमति पशुविशेषेऽर्थे विवक्षिते प्रयोगकर्त्रा गौरिति शब्दमनुच्चार्य गोणीत्यादिसाधुत्वसंस्कारविहीनान् शब्दान् उच्चारयति तदैतादृश: शब्द: सास्नादिमति पशुविशेषेऽर्थे विनिविष्टा: गोणीत्यादय: शब्दा: अपभ्रंशा इति कथ्यन्ते। तत्र कारणं शब्दानामुच्चारणे प्रमादोऽशक्तिर्वा यत्किञ्चिदपि भवतु, गोणीत्यादिशब्दानां सास्नादिमति पशुविशेषेऽर्थे केनाप्युपायेन शक्तिग्रहो न कारित: प्रत्युत् गो इत्यादिशब्दानां कोशादिर्बहुभि: शक्तिग्राहकैस्तत्र शक्तिग्रह उत्पादितोऽतस्तादृशे पशुविशेषेऽर्थे गौरिति शब्द: साधुरस्ति अन्ये च देशादिभेदेन प्रयुज्यमाना गावीत्यादयोऽपभ्रंशा अपशब्दा वेत्युच्यन्ते। वाक्यपदीयस्य श्रीहरिवृषभेणोदितायां स्वोपज्ञवृत्तौ निगदितमाचार्येण यत् तत्र गौरिति प्रयोक्तव्येऽशक्त्या प्रमादादिभिर्वा गाव्यादयस्तत्प्रकृतयोऽपभ्रंशा प्रयुज्यन्ते। ते च सास्नादिमत्येव लब्धस्वरुपा: साधुत्वं विजहति[2] इति। तदेवमत्र निर्णेतुं शक्यते यत् कश्चिदपि शब्दोऽपभ्रंशत्वमेभिस्त्रिभि: कारणैरवाप्नोति-

1. साधुशब्दानां प्रयोक्तुमिच्छा,
2. प्रयुक्तानां शब्दानां साधुत्वसंस्कारच्युति:,
3. साधुशब्दानामर्थबोधनाय असंस्कृतशब्दानां प्रयोगश्च।

एतेषां त्रयाणामपि कारणानां विषये क्रमशो विचार्यते। तद्यथा –

1. साधुशब्दानां प्रयोक्तुमिच्छा- अपभ्रंशस्य स्वरूपनिर्धारणे आवश्यकरूपेण शब्देन व्यवहर्तु: साधुशब्दानां प्रयोगस्येच्छा प्रथममथ च मूलं कारणमस्ति। शब्दसाधुत्वसंस्कारविरहितानां शब्दानां प्रयोगे वक्तरि साधुशब्दप्रयोक्तुमिच्छाया सर्वापेक्षया अनिवार्यरूपेण आवश्यकता भवति। अत महाभाष्यानुसारेण यदा ऋतकासाधुदिशब्दानां प्रयोगस्येच्छा जरीजागर्ति तदानीं वाक्यस्य प्रयोगकर्त्रा अशिक्षया उच्चारणावयवानां कण्ठताल्वादिनां वैकल्यप्रयुक्तासमर्थ्यवशाच्च ऋतकशब्दोच्चारणधिया लृतकादिशब्दानाम् उच्चारणं

[1] वाक्यपदीयस्य ब्रह्मकाण्डे 1.148 |

[2] वाक्यपदीयस्य स्वोपज्ञवृत्तौ 1.147।

© Association of Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

क्रियते तदा स एव लृतकशब्दो ऋतकशब्दप्रयुयुक्षायां सत्याम् अपभ्रंश इति निश्चयेन भवति।

इदानीम् अत्र बोधनीयं भवति यत् कस्यचिदपि अपभ्रंशशब्दस्य प्रयोगात् प्राक् साधुशब्दस्य प्रयुयुक्षा अस्ति न वेत्यत्र किं विनिगमकमस्तीत्यत्र वृषभदेवेनोच्यते तच्छब्दप्रयुयुक्षु: कथमवगम्यते चेत् तदवयवानामवगमदर्शनात् तत्कार्यस्य तदर्थप्रत्यायनस्य तत्र दर्शनादि[3]ति निगदितम्। अस्य तात्पर्यमस्ति यत् साध्वसाधुशब्दयोरवयवानां तथा च तेन बोध्यमानस्यार्थस्य साम्यवैषम्ययोराधारीकृत्य एव सानिर्णीयते। साध्वसाधुशब्दयोरवयवानां साम्यं तथा च तेन बोध्यस्यार्थस्य साम्यं निश्चयेन साध्वसाधुशब्दयो: प्रकृतिविकृतिभावस्य निर्धारकं भवत्येव।

२. प्रयुक्तानां शब्दानां साधुत्वसंस्कारच्युति: - अपभ्रंशशब्दानां स्वरूपस्य निर्णयाय द्वितीयं मुख्यं कारणमस्ति तेषां शब्दानां शब्दसाधुत्वसंस्कारभ्रष्टता। संस्कार इति पदेन शब्देषु कञ्चिदुत्कर्षाधायकं तत्त्वविशेषं नैवास्त्यपितु संस्कारपदेन व्याकरण शास्त्रविहित प्रकृतिप्रत्ययविभागप्रदर्शनपूर्वकं तत्तदर्थबोधनद्वारा साधुत्वसम्पानमेवास्ति।[4] यतो हि व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागेन शब्दा अनेनेति व्याकरणशब्दस्य निरुक्त्या अपि इदमेव प्रकाशितं भवति यत् प्रकृतिप्रत्ययादिविभागकल्पनापूर्वकं शब्दानां साधुत्वसंस्कारबोधनं व्याकरणशास्त्रस्य मुख्यं कार्यमस्ति। इदमेव शब्दानां साधुत्वसंस्काराहित्यं प्रकृतिप्रत्ययवर्णादिषु कमप्याश्रित्य भवितुं शक्नोति।

३ साधुशब्दानामर्थबोधनाय असंस्कृतशब्दानां प्रयोग: - साधुशब्दानामर्थबोधनाय असंस्कृतशब्दानां क्रियात्मक: प्रयोग: अपभ्रंशशब्दानां स्वरूपनिर्णयाय मुख्यं तृतीयं कारणमस्ति यतो हि ते शब्दा: कञ्चिदर्थविशेषमधिश्रित्य प्रयुक्ता: स्यु:।[5] तात्पर्यमस्ति यत् यदा साधुत्वसंस्कारभ्रष्टस्य शब्दस्य प्रयोग: साधुशब्दानामर्थबुभुत्सया क्रियते तदैवासौ शब्दसाधुत्वसंस्कारच्युत: शब्दोऽपभ्रंशस्वरूपतां गृह्णाति नान्यथा। यतो हि सास्नादिमति पश्वर्थे विवक्षिते एव गाविगोण्यादिशब्दा: प्रयुक्तास्तेऽपभ्रंशत्वमर्हन्ति, किन्तु त एव गोण्यादय: शब्दा: विषयान्तरेषु आवपनादिष्वर्थेषु अभिनिष्टास्सन्ति चेन्नूनमेव ते साधव एव सन्ति। वाक्यपदीयकर्त्रा निगद्यते -

**अस्वगोण्यादय: शब्दा: साधवो विषयान्तरे।**
**निमित्तभेदात्सर्वत्र साधुत्वं च व्यवस्थितम्।।[6] इति**

अस्य तात्पर्यमस्ति नास्ति स्वम् अर्थात् धनं यस्य इत्यस्मिन्नर्थे अस्वशब्द: प्रयुज्यते आवपनमर्थं बुभुत्सया च गोणी इति शब्द: प्रयुज्यते तदा निमित्तभेदात् अर्थात् प्रवृत्तिनिमित्तभेदादेते

[3] वाक्यपदीयस्य स्वोपज्ञवृत्तौ 1.147।

[4] न विशिष्टोत्पत्तिरत्र संस्कार: अपितु प्रकृतिप्रत्ययादिविभागेनायुक्त: ईश्वरप्रत्यभिज्ञाकारिका तत्त्वविमर्शिनी व्याख्यायुता पृष्ठम्- 1.147।।

[5] . तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशनम् वाक्यपदीयस्य ब्रह्मकाण्डे- 1.147।।

[6]. तत्रैव-1.148।

© Association of Academic Researchers and Faculties (AARF)

साधुभावोपेता: सन्त्येवाङ्गीक्रियतां यतो हि शब्दानां साधुत्वासाधुत्वमुभयमपि व्यवस्थया निर्धारितमस्ति। यदि च त एव शब्दा: अश्वत्वजातिं गोत्वजातिञ्च प्रवृत्तिनिमित्तमादाय प्रयुक्ता भवन्ति तदा असाधव एव भवन्ति।[7]

अभिप्रायमेतद्वर्तते यत् शब्दे संस्कारहीनतायां सत्यामपि अर्थसाम्यमाश्रित्यैव अर्थात् साध्वसाधुशब्दयोरर्थसाम्यवैषम्यमादायैव साधुशब्दापभ्रंशयोर्विवेचनं कर्तुं शक्यते। अथात्र शब्दस्यापभ्रष्टत्वे मौलं बीजमिति विचारप्रसङ्गे वाक्यपदीयकर्तुर्मतेन शब्दप्रयोक्तु: साधुशब्दोच्चारणवैषयिक: प्रमादोऽशक्तिर्वा[8] तेषां साधुत्वसंस्कारच्युतौ उत्तरदायित्वं निर्वहन्ति। अथेदानीं विच्चार्यते यत् उच्चारणमुच्चारणकर्त्रमधिश्रित्य तिष्ठति तथा च उचारणकर्तरि प्रमादोऽर्थात् विस्मृति: सन्देहो वा सर्वथैव सम्भाव्यन्ते। त एव शब्दमनुप्रविश्य निरन्तरमपभ्रंशान् जनयन्ति शब्दाँश्च दूषयन्त्यपि।

इदानीं विचारणीयमिदमस्ति यत् प्रकृतिवदनुकरणं भवतीति नियमो वरीवर्त्येव। एतदनुसारेण यथा साधुशब्दस्यानुकरणं शिष्टानां व्यावहाराणाञ्चानुकरणं साधव एव भवन्ति तथैव असाधुशब्दानाम् अनुकरणं साधुर्भवति अथवा तदपि असाधुरेव भवति। यतो हि कस्याश्चित् क्रियाया सदृश्यनुकृतिरेव अनुकरणं भवति।[9] अत्रोच्यते यत् केनचिज्जनेन असिना निष्पादितं कस्यचित्प्राणिनो वधं सुरां च पेपीयमानं जनं दृष्ट्वा कश्चित्पुरुष: असिनैव कञ्चिदृहन्यात् मदिरापाने च प्रवृत्तो भवेत् तर्हि तेनाचरिते वधपाने सुतराम् एवाधर्मं जनयत: किन्तु यदि वधानुकुर्वतस्तेन जनेनासिं गृहीत्वा कदलीस्तम्भस्य छेदनं कुर्यात् चषकं पूरयित्वा तेन पयोपानं कुर्यात् तथापि असौ पुरुष: प्राणिवधजन्येनाधर्मेण मदिरापानजन्येनाधर्मेण च नैव स्पृष्टो भवति। यतो हि छेदनकर्म पानकर्म च छेदनत्वेन पानत्वेन च तुल्यत्वेऽपि अर्थात् क्रियासाम्येऽपि विषयभेदात् स्तम्भछेदनं न प्राणिवधतुल्यं न च पयोपानं मदिरापानतुल्यमस्ति। अर्थात् विषयभेदमाश्रित्यैव धर्माधर्मौ व्यवस्थितौ तथैव विषयभेदमाश्रित्यैव अत्र साधुत्वासाधुत्वे व्यवस्थिते। उपरोक्त्या रीत्या अपभ्रंशस्य अनुकरणं विषयतामाश्रित्य स्वयमपि अपभ्रंशत्वं नैव भजते।

अथ च शिष्टैर्भगवद्भि: पाणिनीयादिभिरुपदिष्टा एव प्रकृतयो भवन्ति[10] अपभ्रंशास्तैरनुपदिष्टा एवेत्यतस्तत्र प्रकृतिवदनुकरणं भवतीति नियमो न प्रवर्तते अनुमानात् सामर्थ्याच्च गृहीता व्याकरणशास्त्रे प्रकृत्वेन न गृह्यन्ते[11] तथा च प्रकृतिवदिति परिभाषा शास्त्रीया अस्ति इति कारणाच्च[12] अपभ्रंशेषु न प्रवृत्ता भवति इति कारणाच्च अपभ्रंशानामनुकरणमपि अपभ्रंशत्वाय न भवति इति हार्दम्।

---

7 . तत्रैव-1.148 भावप्रकाशव्याख्यायाम्।

8 पुरुषा: प्रमादशक्तेर्वा अपभाषन्ते यत इदमनुशासनम्।यथा तैत्तिरीया: कृतणत्वमग्निशब्दमुच्चारयन्ति। महाभाष्यस्य दीपिकाव्याख्यां पस्पशाह्निके।

9 . यत्र हि अनुकृतमात्रं क्रियासादृश्यादृश्यते तदनुकरणं भवति , महाभाष्यस्य दीपिकाव्याख्यां पस्पशाह्निके।

10 . पाणिनीयं सूत्रम्-1.1.56।

11 . अनुमानादपशब्द इत्येवमन्वाख्यायते, न च सामर्थ्यगृहीता प्रकृतिर्भवितुमर्हति।, महाभाष्यदीपिका पृष्ठम्- ६४।

12 वाक्यपदीयस्य स्वोपज्ञवृत्तौ 1.147।

© **Association of Academic Researchers and Faculties (AARF)**

अथात्र विचार्यते यत् यथा संस्कृतशब्देनार्थबोधनं भवति तथैव अपभ्रंशेभ्योऽपि भवति उत वा ततः अर्थबोधने प्रक्रिया भिन्ना अस्ति। व्यवहारे साधुशब्दप्रयोगादर्थबोधो जायते तथैव अपभ्रंशशब्दानां प्रयोगानन्तरमर्थबोध जायत एव। साधुशब्दापभ्रंशशब्देभ्योऽर्थबोधनसाम्यं दृष्ट्वा प्रश्नः समुत्तिष्ठति यत् येन प्रकारेण संस्कृतशब्दानां प्रयोगानन्तरं साक्षादेवार्थबोधः समुदेति तथैव अपभ्रंशशब्दानां प्रयोगानन्तरमपि साक्षादेवार्थबोधः सञ्जायते अथवा संस्कृतशब्दमन्तराकृत्वा तेऽर्थबोधजनने समर्थाः भवन्ति। अत्र वैयाकरणेषु अत्यन्तगम्भीरस्य विचारस्याविष्कारको श्रीमन्नागेशभट्टः शास्त्रान्तरेषु निहितं अपभ्रंशविषयकं प्रतिपादनं प्रतिष्ठाप्य वैयाकरणानामपि विचारं परीक्षितवान्। तैस्तत्र न्यायविद्याविचारकाणां मतमनुद्य स्थापितं यत् गवादयः शब्दा एव वाचकताशक्तेराश्रयभूताः भवन्ति न तु गाव्यादयः। किमक्षिनिकोचादीनामन्त्यजनपदवाचां नास्ति शक्तिः? ओमित्युच्यते। कथं तर्हि तेभ्योऽर्थप्रतिपत्तिस्तु स्वकृतसमयमात्रनिबन्धनास्तेभ्यः नैयायिकानां क्व वा न समयः प्रतिपत्त्युपायः, सत्यम् स त्वीश्वरप्रणीतः प्रथमसर्गात् प्रभृति प्रवृत्तेः मीमांसकाऽभ्युपगतः नैसर्गिकशक्तिसोदर्य एव न मादृशरचितपरिमितविषयसमानः स च गवादिष्वेव प्राप्तप्रतिष्ठो न गाव्यादिषु। ते तु वर्णसारूप्यच्छायया गवादिशब्दस्मृतिमादधानाः तदर्थप्रतिपत्तिहेतुतामुपगच्छन्ति।[13] अस्य तात्पर्यमेतद् वर्तते यत् केवलं साधुशब्देष्वेव वाचकताशक्तिरस्ति न तु अपशब्देषु। यथा अक्षिनिकोचहस्तचेष्टादीङ्गितादिषु स्वाभाविकी शक्तिर्नास्ति तथैव अपभ्रंशेष्वपि अर्थावबोधस्य स्वाभाविकी शक्तिर्न भवति। अर्थावबोधे ईश्वरेच्छाकृतसङ्केतस्यैव कारणता भवति किन्त्वपभ्रंशेषु ईश्वरकृतोः संकेतो न भवति। तत्रापभ्रंशेषु संकेतस्तु मनुष्यकृदेव भवति इति मन्यते तस्मात् अपभ्रंशेभ्यः साधुशब्दस्मरणद्वाराऽर्थबोधो भवतीति दिक्। तत्रैतस्मिन् विषये एतेषां विदुषां सम्मतिरस्ति यच्छास्त्रज्ञानाम् अपभ्रंशप्रयोगे साधुशब्दस्मरणद्वारा साधुशब्दव्यधानपूर्वकम् अर्थबोधो[14] भवति,शास्त्रज्ञानविवर्जितानां पामराणां तिरश्चां च सास्नादिमत्पदार्थस्य वाचक एवायं गावीशब्द इति शक्तिभ्रमाद् बोधो जायते। तथा च अज्ञैः व्यवहारपरम्परायां गावी इत्ययमेव शब्दो रूढ्या प्रयुज्यते। किन्तु सत्यप्येवं मीमांसकैस्तत्रापभ्रंशेषु साक्षाद्वाचकत्वं नैवाङ्गीक्रियते।

यथा शब्देभ्योऽर्थप्रतिपत्तिर्भवति इति इदं सत्यं तथैव अपभ्रंशेभ्योऽप्यर्थप्रतिपत्तिर्भवत्येव इदमपि ध्रुवं सत्यमस्ति। परन्तु भर्तृहरिमतेन विदुषामविदुषाञ्च अपभ्रंशादर्थबोधनस्य प्रक्रिया भिन्नमेवास्ति। तत्र विदुषाम् अपशब्दश्रवणानन्तरमादौ सादृश्यात् साधुशब्दानां स्मरणं भवति तदनन्तरन्ततोऽर्थबोधनं भवति। विगुणाभिधातॄणां तु अपभ्रंशेभ्यः साक्षादेवार्थस्य सम्प्रत्ययो भवति। उक्तं यथा वाक्यपदीये –

**अम्बाम्बेति यथा बालः शिक्षमाणः प्रभाषते।**
**अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चयः॥**[15]

---

[13] न्यायमञ्जरी पृष्ठम्- 388, काशी संस्कृतसीरीज बनारस, 1936।

[14] .प्रत्ययमात्रादवगम्यते सादृश्यासाधुशब्देऽप्यवगते प्रत्ययोऽविकल्प्यते। शाबरभाष्यम्-1.3.26|

[15] वाक्यपदीयस्य ब्रह्मकाण्डे- 1.151।

**एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते।**
**तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते॥**[16]

अर्थात् प्रशिक्षमाणो बालो अथा अव्यक्तरूपेण अम्म अम्म इति वदति तदा साधुशब्दज्ञं प्रतिपत्तारं साधुशब्दव्यवधानेनैवार्थबोधो भवति। व्यवधानेन अर्थप्रतिपत्तेस्तात्पर्यमिदमस्ति यत् येन प्रकारेण अनुमितिज्ञानं सर्वदा हेत्वादिः अर्थात् धूमादिज्ञानाश्रयणात् हेत्वादिव्यवधानेनैव भवति तेनैव प्रकारेण अपभ्रंशा अपि न साक्षादर्थबोधं जनयन्ति अपितु अर्थेन सह नित्यसम्बन्धवतां साधुशब्दानां स्मरणपूर्वकम् अर्थात् शब्दव्यवधानपूर्वकं प्रकृतिविकारद्वारा सम्बन्धिशब्देन परम्परासम्बन्धेन वार्थबोधं जनयन्ति। न केवलं वाक्यपदीयमेव अपभ्रंशेषु आनुमानिक्यमर्थवत्वं[17] प्रबोधयति अपितु अनुमानपक्षेण तु सम्बन्धिसम्बन्धात् अक्षिनिकोचादिवदपभ्रंशाः प्रत्ययविशेषेष्वङ्गभावमुपगच्छन्ति[18] इति यथा लिङ्गं स्वज्ञानव्यवधानेन लिङ्गिनमनुमापयति यथा वानुमेयज्ञानं सामान्याकारव्यवधानेन स्वलक्षणं अपभ्रंशा इति। तथा गोण्यादयः शब्दाः गोशब्दव्यवधानेन[19] इति च वदन्तौ हरिवृषभवृषभदेवौ अपि तदेव समर्थितवन्तौ। अस्मिन् विषये वाक्यपदीयस्य व्याख्याता श्रीहेलाराजोऽपि निगदति यत् दैवी वाग् अशक्तैर्व्यवकीर्णा बालवदन्धादिवदनुमितमूलप्रकृतिर्विदुषां वाचिका[20] इति।

विगुणाभिधाता तु साधुशब्दानभिज्ञत्वात् साधुशब्दश्रवणानन्तरं किमयं शब्द इति संशये समुत्पन्ने सति तेन शब्देन सहाभिसम्बद्धं अज्ञजनपरम्पराप्राप्तं रूढ्या प्रसिद्धं वा अपभ्रंशानुस्मरणपूर्वकमेवार्थं गृह्णाति[21] । स च शास्त्राणामनभिज्ञाता तान् एवापभ्रंशान् साक्षादर्थस्य वाचकत्वेन गृह्णाति। शब्दप्रयोगस्य मुख्यं कारणं अर्थप्रत्यायनेन समं अभ्युदयसाधनत्वमपि वर्तते। व्याकरणाशास्त्रस्य महाभाष्ये उक्तं वर्तते –एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति[22] इति। एतदतिरिक्तं वाक्यपदीये श्रीमता भर्तृहरिणाऽप्युच्यते यत् वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः[23] इत्युक्त्वा यद्यप्येषपक्षः स्यात् साधुवदपशब्दाः वाचकाः इत्येवमपि दृष्टं फलं तुल्यमर्थावबोधः। इह तु दृष्टं फलमस्त्यभ्युदयः[24] इति। तत्र तुल्यार्थावबोधदशायां भाष्यकृतोऽप्युक्तं समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देन इत्येवं क्रियमाणमभ्युदयकारी भवती[25]ति।

---

16 वाक्यपदीयस्य ब्रह्मकाण्डे- 1.151।

17 वाक्यपदीयस्य स्वोपज्ञवृत्तौ 1.151।

18 तत्रैव 1.152।

19 वाक्यपदीयस्य स्वोपज्ञवृत्तौ 1.26।

20 वाक्यपदीयस्य हेलाराजीयव्याख्यायाम्-3.3.30।

21 पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु।प्रसिद्धिमागता येषु तेषां साधुरवाचकः॥वा.प.-1.153।

22 पा. सू. महाभाष्यम् -6.1.64।

23 वाक्यपदीयम् -3.3.30।

24 महाभाष्यदीपिकाव्याख्यायाम्- पृष्ठम्- 32।

25 महाभाष्यपस्पशाह्निके धर्मजनकताधिकरणे।

**उपसंहार:-**

जना: स्वात्मन: हृद्गतान् भावान् स्वेतरेषां जनानां बोधनाय बहूनां अभिनयादिनाम् अव्यक्तध्वनियन्त्रादिनां च आश्रयणं कुर्वन्ति। तेषु साधनेषु मध्ये शब्दप्रयोगरूप: साधनं मुख्यतमं वर्तते। तत्र व्याकरणेनान्वाख्येया: साधवस्तद्विपरीतं व्याकरणेनानन्वाख्येया: असाधवोऽर्थात् अपभ्रंशा:। शास्त्रज्ञानां समूहे साधुशब्देन व्यवहार: प्रचलति। अशास्त्रज्ञा: तत्रत्यग्रामीणभाषामाश्रित्य व्यवहरन्ति। अत्रायं विचार: प्रस्तुतो यत् यथा साधुशब्दा: अर्थस्य बोधका: भवन्ति तथैव अपभ्रंशशब्दा अपि अर्थस्य वाचका: भवन्ति। तदेवं अपभ्रंशशब्दानां प्रयोगे साधुशब्दानां च प्रयोगे उभाभ्यामपि सम्प्रत्यय: अर्थात् भाष्यानुसारमर्थप्रत्यायनरूपं फलं तुल्यमस्ति तथापि अभ्युदयरूपं फलं साधुशब्दानां प्रयोगाल्लभ्यते असाधूभ्यस्तु तन्न लभ्यते इति दिक्।

© **Association of Academic Researchers and Faculties (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.